२७
लिफाफा
①

- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 6
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language –
- Period –
- Beginning – ओं श्री गणेशाय नमः [illegible] काल इति प्राच्यः [illegible] .
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - संस्कृत
- Revisor -
- Author - - अज्ञात
- Remarks- अपूर्ण

अंगुयिधिष्ठिर उवाच॥ वैशाखस्य शुक्लपक्षे तु किंनामैकादशी भवेत्॥ किं फलं को विधिस्तस्याः कथयस्व प्रभो
जनार्दन॥ श्रीकृष्ण उवाच॥ इदमेव पुरा पृष्टं रामचंद्रेण धीमता॥ वशिष्ठं प्रति राजेंद्र यत्त्वं मामनुपृच्छसि॥ श्री
राम उवाच॥ भगवन् श्रोतुमिच्छामि व्रतानामुत्तमं व्रतं॥ सर्वपापक्षयकरं सर्वदुःखनिकृंतनं॥ मया दुःखा
नि भुक्तानि सीताविरहजानि वै॥ ततोहं भयभीतोस्मि पृच्छामि त्वां महामुने॥ वशिष्ठ उवाच॥ साधु पृष्टं त्वया
राम तवैषा नैष्ठिकी मतिः॥ त्वन्नामग्रहणेनैव पूतो भवति मानवः॥ तथापि कथयिष्यामि लोकानां हित
काम्यया॥ पवित्रं पावनानां च व्रतानामुत्तमं व्रतं॥ वैशाखस्य सिते पक्षे राम वैकादशी भवेत्॥ मोहिनी ना
मसा प्रोक्ता सर्वपापहरा परा॥ मोहजालात्प्रमुच्यंते पातकानां समूहतः॥ अस्या व्रतस्य भावेन सत्यं सत्यं
वदाम्यहं॥ अतः कारणतो राम कर्तव्यैषा भवादृशैः॥ पातकानां क्षयकरी महादुःखविनाशिनी॥ शृणुष्वैक
मना राम कथां पापहरां परां॥ यस्याः श्रवणमात्रेण महापापं प्रणश्यति॥ सरस्वत्यास्तटे रम्ये पुरी भद्रा
वती शुभा॥ द्युतिमान्नाम नृपतिस्तत्र राज्यं करोति वै॥ चंद्रवंशोद्भवो नाम धृतिमान्सत्यसंगरः॥ तत्र वैश्यो
निवसति धनधान्यसमृद्धिमान्॥ धनपाल इति ख्यातः पुण्यकर्मप्रवर्तकः॥ प्रपाकूपमठारामतडागा
गृहकारकः॥ विष्णुभक्तिरतः शांतस्तस्य पुत्राश्च पंचकाः॥ सुमना द्युतिमांश्चैव मेधावी सुकृतस्त

उ.न.र.
२३

तैन

ध्या॥ पंचमो धूम्रकेशश्च मद्यपानपरः सदा॥ परस्त्रीसंगनिरतो विटगोष्ठीविशारदः॥ द्यूतादिव्यसनासक्तः।
परस्त्रीरतिलालसः॥ नवदेवार्चनैर्युक्तो न पितॄन्न द्विजानपि॥ अन्यायेन च दुष्टात्मा पितृद्रव्यक्षयंकरः॥ अभक्ष्य
भक्षकः पापी मद्यपाने रतः सदा॥ वेश्यापाके स्थितिमगाद् धर्ममन्दुष्टमनपथे॥ विज्ञाते श्वास्मितो गेहान्निरा
कृष्टो बान्धवैः॥ स्वदेहभूषणान्येव वस्त्राणि नीत्वा ददौ॥ गत्वा काम्यं परस्त्रीकौनिदित्तस्य धनस्य घातात्॥ ततः विनाशितो
वस्त्रधनहीनः तथारितः॥ किं करोमि क्व गच्छामि केनोपायेन जीव्यते॥ नमस्कारं समारभ्य तत्र देवनागरे पितः॥
गृहीत्वा जगाम कृष्णपितृगौरवात्॥ पुनर्देहः पुनर्मृत्युः पुनर्देहः समस्ममे॥ धूम्रकेशो दुराचारो निर्वध्य
निर्गतो हृदयेः॥ कषायाते स्वादितस्य इतस्ततस्तस्य धावति॥ सिंहव्याघ्रगजानाना सोमृगपक्षिकाविभावन॥ ग्रामेषा
हारनिरतो वनेति सनिर्भयः॥ करेशापासने तस्या नित्यं गृहमागते॥ ग्रहत्वे चारिणां हन्ति पतित्तास्य प्रदाव
रत्॥ चकोरांश्च मयूरांश्च कंकतित्तिरपक्षिकान्॥ एतानन्यान् हत्वा सो धोधूम्रकेशोति निर्देहाः॥ सर्वेजन्मकृतैः पा
पैर्निमग्नः पापकर्दमे॥ दुःखशोकसमाविष्टः पीड्यमानो दिवानिशम्॥ कौण्डिन्यस्याश्रमपदे श्रमः पुण्या।
गामान्कृचित्॥ माधवे मासि गङ्गाहृष्यांकृतस्नानेन पावने॥ श्रमस्मार धूम्रकेशो शोकभारेण पीडितः॥
तदास्त्रविंदुस्पर्शेन गतपापोहतिर्न सुभः॥ कौण्डिन्यस्याग्रतः स्थित्वा प्रत्युवाच कृतांजलिः॥ धूम्रकेश उवाच

धनेविवरन्तसंभ्रांत ६

भोभोब्राह्मणद्विजश्रेष्ठदयांकृत्वाममोपरिः ॥ येनपुण्यप्रभावेनमुक्तिर्भवतिनिर्वृद ॥ कौडिन्यउवाच ॥ शृणुष्वै
कमनाभूत्वायेनपापात्प्रमुक्तव ॥ वैशाखस्यसितेपक्षेमोहिनीनामविश्रुता ॥ एकादशीव्रतंतस्याःकुरुमद्वा
क्यनोदितः ॥ मेरुतुल्यानिपापानिनिर्दहत्यंगजानिदेहिनां ॥ बहुजन्मार्जितान्येषामोहिनीसमुपोषिता ॥ इ
तिवाक्यंमुनेःश्रुत्वाधृष्टबुद्धिःप्रसन्नधीः ॥ व्रतंचकारविधिवत्कौडिन्यस्योपदेशतः ॥ जगामवैष्णवंलोकंस
र्वोपद्रववर्जितं ॥ इतीदृशंरामचंद्रउत्तमंमोहिनीव्रतं ॥ नातःपरतरंकिंचित्त्रैलोक्येसचराचरे ॥ यज्ञादितीर
थदानानिकलांनार्हंतिषोडशीं ॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ॥ ॥ इतिश्रीवराहपुरा
णेउत्तरखंडेउमापतिनारदसंवादेवैशाखेशुक्लेमोहिनीनामाध्यायः ॥ ॥ युधिष्ठिरउवाच ॥ ज्येष्ठस्यकृष्णप
क्षेतुकिंनामैकादशीभवेत् ॥ श्रोतुमिच्छामिमाहात्म्यंतद्वदस्वजनार्दन ॥ श्रीकृष्णउवाच ॥ साधुपृष्टंत्वया
राजन्लोकानांहितकाम्यया ॥ बहुपुण्यप्रदाह्येषामहापातकनाशिनी ॥ अपरानामराजेंद्रअपरापुण्यदायि
नी ॥ लोकेप्रसिद्धतांयातिअपरांयस्तुसेवते ॥ ब्रह्महत्याभिभूतोपिगोत्रहाभ्रूणहानयः ॥ परापवादवादी
चपरस्त्रीरसिकोपिच ॥ अपरासेवनाद्राजन्विपाप्माभवतिध्रुवं ॥ कूटसाक्ष्यंकूटमानेतुलाकूटेकितोर
तिसः ॥ कूटवेदंपठेयस्तुकूटशास्त्रंतथैवसः ॥ ज्योतिषीगणकःकूटोकूटआयुर्वेदिकोभिषक् ॥ कूटसाक्ष्यस

उ.ख.
२४

नायुक्तो वित्तैयान नरकौकसः॥ अपरासेवनाद्राजन् पापैर्मुक्तो भवेन्नरः॥ क्षत्रियः क्षात्रधर्मं यस्त्यक्त्वा यु
द्धात्पलायते॥ स याति नरकं घोरं स्वीयधर्मबहिष्कृतः॥ अपरासेवनात्सोपि पापं त्यक्त्वा दिवं व्रजेत्॥ वि
द्यावान्यः स्वयं शिष्यो गुरुनिंदां करोति च॥ स महापातकैर्युक्तो निरयं याति दारुणं॥ अपरासेवनात्सोपि॥
सद्गतिं प्राप्नुयान्नरः॥ महिमानमपरायां शृणु राजन् वदाम्यहं॥ मकरस्थे रवौ माघे प्रयागे यत्फलं नृणां॥
काश्यां यत्प्राप्यते पुण्यं शिवरात्रे कृतोपवासात्॥ गयायां पिंडदानेन पितृणां तृप्तिदायकः॥ सिंहस्थिते देवगु
रौ गौतम्यां स्नानको नरः॥ यत्फलं समवाप्नोति केदारदर्शनान्नरः॥ बदर्याश्रमयात्रायां तत्तीर्थसेवनाद
पि॥ यत्फलं समवाप्नोति कुरुक्षेत्रे रविग्रहे॥ गजाश्वस्वर्णदानेन यज्ञे कृत्वा सदक्षिणं॥ तादृशं फलमाप्नो
ति अपराव्रतसेवया॥ पापद्रुमकुठारीयं पापेंधनदवानलः॥ पापांधकारतरणिः पापसारंगकेसरी॥ बुद्बु
दा इव तोयेषु पुत्रिका इव जंतुषु॥ जायंते मरणायैव एकादश्या व्रतं विना॥ अपरां समुपोष्यैव पूजयित्वा त्रि
विक्रमं॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ पठनाच्छ्रवणाद्राजन् गोसहस्रफलं लभेत्॥
इति श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे ज्येष्ठकृष्णापरैकादशी नामाध्यायः॥ युधिष्ठिर उ
वाच॥ श्रुतं मया महामाहात्म्यमुक्तं मे त्वं जनार्दन॥ ज्येष्ठशुक्लपक्षे तु या स्यात्तां वद माधव॥ श्रीकृष्ण उवाच॥

ॐ
२४

एतां वक्तुं विधिं सर्वां त्वत्तो व्यासः सत्यवतीसुतः ॥ सर्वशास्त्रार्थतत्त्वज्ञो वेदवेदांगपारगः ॥ युधिष्ठिर उवाच ॥ श्रु-
तो मे मानवो धर्मो वाशिष्ठश्च श्रुतो मया ॥ द्वैपायन यथावत्त्वं वैष्णवान्वक्तुमर्हसि ॥ श्रीवेदव्यास उवाच ॥ श्रुता-
स्ते मानवा धर्मा वैदिकाश्च श्रुतास्त्वया ॥ कलौ युगे न शक्यंते ते वै कर्तुं नराधिपैः ॥ सुखोपायमल्पधनं स्वल्पक्ले-
शं महाफलं ॥ पुराणानां च सर्वेषां सारभूतं महामते ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ द्वादश्यां तु कृ-
त्वा स्नानं शुचिः पुष्पैः समभ्यर्च्य केशवं ॥ पश्चाद्भुंजीत सत्कृत्य पश्चाद्द्विजपुरःसरं ॥ सूतके पि न भोक्तव्यं नाशौचे वै जनाधि-
प ॥ यावज्जीवं व्रतमिदं कर्तव्यं पुरुषर्षभ ॥ स्वर्गतिं प्राप्नुयात्सोपि कृत्वेदं यो नरः ॥ युधिष्ठिरादयः पांडवाश्चारणा
विष्णुधर्मव्रजिताः ॥ एकादश्यां न भुंजंते ज्ञानेनैषां नियमांतिके ॥ इति तद्वचनं श्रुत्वा कंपितोश्वत्थपत्रवत् ॥
भीमो महाबाहुर्वेनोहा उवाच सः गुरुं प्रति ॥ भीमसेन उवाच ॥ पितामह महाबुद्धे शृणु मे परमं वचः ॥ युधिष्ठि-
रश्च कुंती च तथा द्रुपदनंदिनी ॥ अर्जुनो नकुलश्चैव सहदेवस्तथैव च ॥ एकादश्यां न भुंजंति कदाचिदपि सु-
व्रत ॥ ते मां ब्रुवंति मां नित्यं मा भुंक्ष्व त्वं वृकोदर ॥ अहं तानुत्तरं ब्रूयां बुभुक्षा दुःसहा मम ॥ दानेन श्रद्धया विधिवा-
न्पूजयिष्यामि केशवं ॥ भीमसेनवचः श्रुत्वा व्यासो वचनमब्रवीत् ॥ व्यास उवाच ॥ यदि स्वर्गमभीप्सेन्नरक-
के दुष्टमेव च ॥ एकादश्यां न भोक्तव्यं पक्षयोरुभयोरपि ॥ भीमसेन उवाच ॥ पितामह महाबुद्धे कथयामि

उ.न.र.
२५

तवाग्रतः ॥ एकभक्तेन शक्तोस्मि उपवासे कुतः प्रभो ॥ वृकोपि नाम यो वह्निः सततं जठरे मम ॥ अतिवेलं य
दाश्नामि तदा सम्यगुपशाम्यति ॥ नैकं शक्नोम्यहं कर्तुं उपवासं महामुने ॥ येनैव प्राप्यते स्वर्गं तन्मे कथय निश्च
यात्नृपं ॥ तदेकं वद निश्चित्य येनाहं श्रेयसा युतः ॥ श्रीव्यास उवाच ॥ वृषस्थे मिथुनस्थे वा यदा ह्येकादशी
भवेत् ॥ ज्येष्ठमासे प्रयत्नेन सोपोष्या उदकवर्जिता ॥ गंडूषाचमनं वापि वर्जयित्वोदकं नरः ॥ उपयुंजीत समवाप्नो
ति द्वादश्यां द्वादशीफले ॥ ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् ॥ जलं स्वर्णं च दत्वा वा द्विजातिभ्यो य
थाविधिः ॥ भुंजीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी ॥ एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत् ॥ संवत्
सरेण यावंत्येकादश्यो भवंति हि ॥ तासां फलमवाप्नोति द्वादश्यां नात्र संशयः ॥ इति मां केशवः प्राह श
ंखचक्रगदाधरः ॥ सर्वान्परित्यज्य धर्मान् मामेकं शरणं व्रजेत् ॥ एकादश्यां निराहारस्ततः पापात्प्रमुच्य
ते ॥ द्रव्यशुद्धिः कलौ नास्ति संस्कारः स्मार्त एव च ॥ वैदिकं च कुतस्त्वापि प्राप्ते दुष्टे कलौ युगे ॥ किं च ते बहुनो
क्तेन वायुपुत्र पुनः पुनः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ एकादश्यां सिते पक्षे ज्येष्ठे मास्युदकं विना
पुण्यफलमवाप्नोति तत्र शृणु वृकोदर ॥ संवत्सरेण यत्प्रोक्ताः शुक्लाः कृष्णास्तु वृकोदर ॥ उपोषिता हि
सर्वास्ता एकादश्यो न संशयः ॥ धनधान्यप्रदा पुण्या पुत्रारोग्यशुभप्रदा ॥ उपोषितेना नरव्याघ्र इति सत्यं ब्रवी

गं
२५

श्रिते ॥ यमदूता महाकायाः कृतांताः क्रूरदर्शनाः ॥ दंडपाशधरा रौद्रा नोपसर्पंति तं नरं ॥ पीतांबरधराः सौ-
म्याश्चक्रहस्ता मनोरमाः ॥ अंतकाले रथं तस्मै नेष्यंति यानं वै स्वर्गीं पुरीं ॥ तस्मात्सर्वप्रयत्नेन उपोष्यारकवजि-
तः ॥ नलदेवेन रारहा सर्वपापैः प्रमुच्यते ॥ तत स्नानमपणाः कौंतेय सोपवासे कृते नरे ॥ ऊर्ध्वं सर्वप्रयत्नेन
सर्वपापप्रणाशने ॥ सोमेन तेपराधोस्ति देवरागनपापिता ॥ भोजये परे हि द्विजवेदपाठकानेवा समरा हरेः ॥ इन्द्र-
ह्यार्थं नतो मे ब्रह्मपापा सपरो भवन्‌ ॥ सर्वपापविनाशाय सुहृद्धर्म समन्वितः ॥ मेहमेदिरमासाद्यं स्मियार-
पुर्सा चयतत्कृते ॥ सर्वतत्समस्तं याति एकादश्यां प्रभावतः ॥ न शाक्नुवंति पेदानं जलधेर्न नराधिपः ॥ एको-
वनः प्रतन्योग्र टकेवस्त्रसंगीतनः ॥ तो यस्य तिय मेयोस्या ऊर्ध्वं तेवसपुण्यभाक् ॥ फलं कोटि सुवर्णस्य या-
मे यामे श्रुते फलं ॥ स्नाने दाने जपे होमे यत्पुण्यं कृतेन नरैः ॥ तत्सर्वं चातयत्प्रासं येन कृतं तत्प्रभाषितं ॥ किया-
परेताधर्मेण निर्मलैकादशी विना ॥ उपोष्य समयं कृत्वा विधिवद्धैर्मपद्ममासं यावन्‌ ॥ सुवर्णमन्नेवासोवायद-
स्यावै प्रदीयते ॥ स देवऊर्ध्वगाहेल सर्ववाप्यतयंभवेत्‌ ॥ एकादश्यां दिने यो नेभुक्तं पापं भुनक्ति सः ॥ इ-
हलोके सर्वेज्ञालोमृतः प्राप्नोति दुर्गतिं ॥ येचरास्यंति रानाविद्धादशयं समुपोषितः ॥ ज्येष्ठमासे सितेपते
प्राप्स्यंति परमं पदं ॥ अतद्धामयपसतेनोगुहदेवीसदाहनी ॥ मन्वंतेपानकर्मसर्वैर्द्वादशीपापरूपाषिना ॥

उ.ब.र.
२६

विशेषं श्रावणे कौंतेय निर्जलैकादशी दिने ॥ एकभक्तेन नक्तेन वैशिष्ठिर्दानेन शुद्धासमन्वितैः ॥ जलशायी च संस्तो
र्यानेन तथा स्मयी ॥ प्रत्यक्षा वा नृपश्रेष्ठ धृतधेनुस्तथापि वा ॥ हरिलीलाभिः सगुप्ताभिर्मिश्राद्वैश्च षट्पद(
तिथेः ॥ त्रोदशीयः प्रयत्नेन द्विजाधर्मभृतां वर ॥ नुप्ताभवेत्तिवेविघातैस्तु हैमैर्लदेह्नदितः ॥ आत्मदेहः कृतलै
ह्निधैर्वा न हन्यतो षिता ॥ पापात्मनो दुराचारा दुष्टास्ते नात्र संशयः ॥ जलानां पानमात्रामिश्रतीतानां नष्या पाने
ग्रात्मना सहृतैनीनं याम्हदेयप्यमंदिरं ॥ धातेदीनेदीनपरेर्वंघद्विलस्तथा हरिं ॥ अर्चै द्विजा गंगां तु चौर्येषा
ससुपोषिता ॥ श्रुत्वैवं स्नातथा गायो जलशायामनंत्रभं ॥ कमंडलु तथाछत्रं सतन्यो निर्जलादिने ॥ उपान
ह्रौ यरसाति पात्रभूते द्विजोत्तमे ॥ स मोदते न यानेन स्वर्गलोके महीपते ॥ यस्तु मां श्रावणे यात्रकृत्वा पश्चापि
परिकीर्तयेत ॥ उभौ तौ स्वर्गमापन्नौ नौ न त्र कार्या विचारणा ॥ एककलं संनिहत्या यांग गंगाविराकरे ॥ कृत्वा
श्राद्धं लभेत्सत्यं सत्रस्याः श्रावणाद्वयं ॥ नियमं च एकभक्तं संरत धावन सर्वके ॥ एकादश्यां निराहारो वजे
यिष्याभिवेजले ॥ केशव पीतवस्त्राय श्रनारायण नारायणे ॥ द्वादश्यां देवदेवेश श्रीवनीयः त्रिविक्रमः ॥ गं
धैर्धूपैस्तथा पुष्पैर्नानाभिः प्रियदर्शनैः ॥ पुजयित्वा विधानेन मंत्रमेन तु दीरयेत ॥ देवदेव हृषीकेश सं
सारार्णवतारक ॥ उदकुंभप्रदानेन नय मां तां परमां गतिं ॥ ज्येष्ठमासि तवे भीमः या शुक्लैकादशी शुभाः ॥ नि

क्लेसमनुपोष्याद्यजलकुंभान्सशर्करान् ॥ प्रदायविप्रमुख्येभ्योमोदतेविष्णुसन्निधौ ॥ ततःकुंभाप्रदानव्या
ख्यान्नानांचभक्तितः ॥ भोजयित्वाततोविप्रान्स्वयंभुंजीततत्परः ॥ एवंयःकुरुतेपुण्यांद्वादशींपापनाशि
नीं ॥ सर्वपापविनिर्मुक्तोपदंगच्छत्यनामयं ॥ ततःप्रभृतिभीमेनकृतात्वेकादशीशुभा ॥ पांडवद्वादशीना
म्नालोकेख्याताबभूवह ॥ इतिश्रीपद्मपुराणेउत्तरखंडेउमापतिनारदसंवादेज्येष्ठशुक्लानिर्जलैकादशी
नामाध्यायः ॥ ॥ युधिष्ठिरउवाच ॥ ॥ आषाढकृष्णपक्षेतुकिंनाम्नैकादशीशुभा ॥ कथयस्वप्रसा
देनवासुदेवममाग्रतः ॥ श्रीकृष्णउवाच ॥ ॥ व्रतानामुत्तमंराजन्कथयामितवाग्रतः ॥ सर्वपापक्षयकरं
सर्वभुक्तिप्रदायकं ॥ आषाढस्यासितेपक्षे [illegible]
योगिनीनामनामतः ॥ एकादशीनृपश्रेष्ठमहापातकनाशिनी ॥ संसारार्णवमग्नानांपोतभूतासनात
नी ॥ जगत्त्रयेसारभूतायोगिनीव्रतकारिणां ॥ कथयामितवाग्रेहंकथांपौराणिकींशुभां ॥ अलकाया
राजराजःशिवभक्तिपरायणः ॥ तस्यासीत्पुष्पबटुकोहेममालीतिनामतः ॥ तस्यपत्नीसुरूपाचविशा
लाक्षीतिनामतः ॥ सतस्यांचासक्तमनाकामपाशवशंगतः ॥ मानसात्पुष्पनिचयमानीयस्वगृहे
स्थितः ॥ पत्नीप्रेमरसासक्तोनकुबेरालयंगतः ॥ कुबेरोदेवसदनेकरोतिशिवपूजनं ॥ मध्याह्नसमयेराज

उ०ख०
९१

न्पुष्पाणामसमीलकः ॥ हेममाली स्वभवने रमते कांतया सह ॥ यक्षराट् प्रत्युवाचाथ कालातिक्रमकोपि
तः ॥ कस्मान्नायाति भो यक्षा हेममाली दुरात्मवान् ॥ निश्चयः क्रियतामस्य इत्युवाच पुनः पुनः ॥ यक्षा ऊचुः ॥
वनिताकामुको गेहे रमते स्वेच्छया नृप ॥ तेषां वाक्यं समाकर्ण्य कुबेरः कोपपूरितः ॥ आह्वयामास तं तूर्णं
वटुकं हेममालिनं ॥ ज्ञात्वा कालात्ययं सोपि भयव्याकुललोचनः ॥ अस्नात एव आगम्य कुबेरस्याग्रतः स्थि
तः ॥ तं दृष्ट्वा धनदः क्रुद्धः क्रोधसंरक्तलोचनः ॥ प्रत्युवाच रुषाविष्टः कोपप्रस्फुरिताधरः ॥ धनद उवाच ॥ पा
पदुष्ट दुर्वृत्त नष्ट त्वया त्वं देवहेलने ॥ श्वित्रोदरः कुष्ठहतो वियुक्तः कांतया सह ॥ अस्मात्स्थानादपध्वस्तो ग
च्छस्व प्रमथाधम ॥ इत्युक्ते वचने तेन तस्मात्स्थानात्पपात सः ॥ महादुःखाभिभूतश्च कुष्ठैः पीडितविग्रहः ॥
न सुखं दिवसे तस्य न निद्रां लभते निशि ॥ छायायां पीडितस्तत्र निदाघे तेन पीडितः ॥ शिवपूजाप्रभावेन
स्मृतिस्तस्य न लुप्यते ॥ पातकेनाभिभूतोपि पूर्वकर्म स्मरत्यसौ ॥ भ्रममाणस्ततो गच्छन् हिमाद्रिं पर्वतो
त्तमं ॥ तत्रापश्यन्मुनिवरं मार्कंडेयं तपोनिधिं ॥ यस्यायुर्विद्यते राजन् ब्रह्मणो वयसा समं ॥ ववंदे चरणौ
तस्य दूरतः पापकर्मकृत् ॥ मार्कंडेयो मुनिवरो दृष्ट्वा तं कंपितं तदा ॥ परोपकारणार्थाय समाहूयेदमब्र
वीत् ॥ कस्मात्कुष्ठाभिभूतस्त्वं कुतो निंद्यतरो ह्यसि ॥ इत्युक्तः स प्रत्युवाच मार्कंडेयं महामुनिं ॥ राजर

राजस्थान्नवरो हेममालीति नामतः ॥ मानसात्पद्मनिचयमानीयान्नस्यहं स्नुने ॥ शिवपूजनवेला।
यां कुवेरस्य समये ॥ एकस्मिन्दिवसे चैव कान्तास्त्राविधृतो मया ॥ पत्नीस्नेहप्रसक्तेन शोकस्या
कुलचेतसा ॥ ततः कुद्धेन स्वामिना स्मितराज्ञा राजेन्द्रवैश्रवणे ॥ कुत्वाभिभूतान्संज्ञानो विकृतः कोनयानया ॥ पु
धुनात्वसाविधंधाम्नोस्मि सुभक्तमेत्म ॥ स्वतेयस्वभावतिस्थितं सृष्टोपकारात्मतत्सं ॥ इतिलाला मतिश्रे
ष्ठ मेगृहस्थाः कुतनामसं ॥ मार्कंडेयउवाच ॥ कृपाम्युत्पसिंहस्पोक्त्वा मन्सभाषितेयतः ॥ शृणोतत्त्वोपदेशं
तेकूयेपायाभिशुभप्रदं ॥ आषाढीकृष्णपक्षेतु योगिनीव्रतमाचर ॥ अस्यव्रतस्यपुण्येन कुष्ठंयास्यतिवैध्रुवं
इतिवाक्ये ततः श्रुत्वा दंडवत्पतितोभुवि ॥ उत्थापितः समीरेण भूयानीयहर्षितः ॥ मार्कंडेयोपदेशेन व्रतंतेने
नकृतं यथा ॥ अष्टाशरेणावकुष्ठान्निर्गतानिनस्यसर्वशः ॥ मुनेर्वाचा ततः सम्यग्व्रतेनमुक्तो भवेन्मुनी ॥ ईदृ
शंविधं नृप कृष्णपक्षे चैव योगिनीव्रतं ॥ अष्टाशीतिसहस्राणि द्विजान्भोजयतेनयः ॥ तत्समं फलमाप्नो
ति योगिनीव्रतकृन्नरः ॥ महापापप्रशमनं महापुण्यफलप्रदं ॥ पठनाच्छ्रवणान्मर्त्यः सर्वपापैः प्रमुच्य
ते ॥ इति पद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे आषाढकृष्णा योगिनीनामाध्यायः ॥ युधिष्ठि
र उवाच ॥ आषाढस्य सिते पक्षे का वा एकादशी भवेत् ॥ किं नाम किं फलं तस्या एतद्विस्तरतो वद ॥ श्री

उ.न.र.
२९

कृष्णउवाच॥कथयामिमहापुण्यांस्वर्गमोक्षप्रदायिनीं॥आयनीनाममन्नामेतिसर्वपापहरांपरां॥यस्याः
श्रवणमात्रेणवाजपेयफलंलभेत्॥सत्यंसत्यंमयाप्रोक्तंनातःपरतरंस्मृतं॥पापिनांपावनायायस्मृता
धात्रामहीतलेयथा॥पुनःपरताराजेंद्रवर्त्ततेमोक्षदायिनी॥आषाढेवामनश्चैवपूज्यतेपरमेश्वरः॥वामनःप्र
जितोयेनकमलःकमलेक्षणः॥आषाढस्यासितेपक्षेकामिकायांदिनेनया॥तेनार्चितंजगत्सर्वंत्रयोदेवाः
सनातनाः॥कृत्वाचैकादशींयेनहरिवासरमुत्तमं॥युधिष्ठिरउवाच॥संशयोस्तिमहान्मेचशृणुतांपुरुषो
त्तम॥कथंस्वपितिदेवेशःकथंचबलिमाश्रितः॥कथंचभूमौसंवेष्टःकिंकुर्वंतिजनाःपरे॥एतद्वदमहा
मातसंशयोस्तिमहान्मम॥श्रीकृष्णउवाच॥शृणुत्वंराजशार्दूलकथांपापहरांपरां॥यस्याःश्रवणमा
त्रेणसर्वपापहरापरा॥बलिर्नामासदैत्यासीत्त्रेतायुगेनृप॥ममभक्तश्चमांनित्यंपूजकोममनारा
णः॥यज्ञैस्तुविविधैर्दैत्योयजतेमांसनातनं॥भक्त्याचपरयाराजन्यत्नात्कृत्वानकृतक्षणा॥पांविवार्थेब
इधामवेदानांसूक्तिभिः॥ग्रहणार्हैर्जनैःसार्धंचइधासमिन्नोपहे॥ततोवामनरूपेणभुवनारेवयंचमे
प्रगुग्रहूपेणनरासर्वेभुक्तोऽहंपिता॥वामनकुलेनजितोदैत्यःसत्यमाश्रित्यसंस्थितः॥अक्रमंवारया
मामयज्ञात्यागात्मनं॥पातिनाचतथाराजन्सार्द्धंचपपराज्ञया॥संकल्पोह्यकमांजनकोत्स्येवयदा

स्तुति

ॐ
२९

12

नयेन्नीहृतेनरासमस्तवज्रभाः॥ चातुर्मास्येनैवेद्यैर्हूतोमेध्यमिष्टापीभवेन्नरः॥ श्रावणोवर्तयेत्काकं दधि
भाद्रपदेतथा॥ इषिमासगुडमिश्रान्नंकार्तिकेहैटलेन्नपेनेन॥ शयनाद्रुत्थानपर्यन्तंयस्त्यजेत्परमांगति॥
प्रकारेणपात्रेनैवशुभान्यापैविंशन्नुयते॥ कर्तव्यासर्वदाराजन्नविस्मृत्यानेकाहिंचित्॥ शायिनीबोधिनी
मध्येयास्तुसैकादशीभवेत्॥ सेवोपोष्यागृहस्थस्यनान्याकृष्णाकदाचन॥ श्रृणुष्वास्त्रैवयेरान्नक्रया
पापघ्नीपरा॥ अश्वमेधस्ययज्ञस्यफलमाप्नोतिमानवः॥ इतिश्रीपद्मपुराणेउत्तरखंडेउमापतिनारद
संवादेदेवशयन्येकादशीनामाध्यायः॥ युधिष्ठिरउवाच॥ श्रावणस्यासितेपक्षेकिंनामैकादशीभवे
त्॥ ततनःकृष्णयगोविंदवासुदेवनमोस्तुते॥ श्रीकृष्णउवाच॥ श्रृणुराजन्प्रवक्ष्यामिव्याख्यानंपाप
नाशनं॥ यत्प्रोक्तंब्रह्मणापूर्वंपृष्टेननारदायवै॥ नारदउवाच॥ भगवन्श्रोतुमिच्छामित्वत्तोहंकम
लासन॥ श्रावणस्यासितेपक्षेकिंनामैकादशीभवेत्॥ कोदेवःकोविधिस्तस्याःकिंपुण्यंकथयप्रभो॥
ब्रह्मोवाच॥ श्रृणुनारदतेवच्मिलोकानांहितकाम्यया॥ श्रावणेकादशीकृष्णाकामिकानामनामतः
श्रवणात्तस्यमाहात्म्याद्वाजपेयफलंलभेत्॥ पूजयेत्तत्रदेवेशंशंखचक्रगदाधरं॥ श्रीधराख्यंहरिं
विष्णुंमाधवंमधुसूदनं॥ पूजनेध्यायनेयोवैतस्यपुण्यफलंश्रृणु॥ नगंगायांनकाश्यांचनैमिषेनचपु

ष्णे॥ यत्फलं समवाप्नोति तत्फलं कृष्णपूजनात्॥ ससागरवनोपेतां यो ददाति वसुंधरां॥ कामिका
व्रतकारी च उभौ समफलौ स्मृतौ॥ प्रसूयमानां यो धेनुं दद्यात्सोपस्करां शुभां॥ तत्फलं समवाप्नोति का
मिकाव्रतकारकः॥ श्रावणे श्रीधरं देवं पूजयेद्यो नरोत्तमः॥ तेनैव पूजिता देवा गंधर्वोरगपन्नगाः॥ त
स्मात्सर्वप्रयत्नेन कामकादिवसे हरिः॥ पूजनीयो यथाशक्ति मानवैः पापभीरुभिः॥ ये संसारार्णवे मग
्नाः पापपंकसमाकुलाः॥ तेषामुद्धरणार्थाय कामिकाव्रतमुत्तमं॥ नातः परतरं काचित्पवित्रा पाप
नाशिनी॥ एवं नारद जानीहि स्वयमाह परो हरिः॥ अध्यात्मविद्यानिरतैर्यत्फलं प्राप्यते नरैः॥ ततो ब
हुतरं विद्धि कामिकाव्रतसेविनां॥ रात्रौ जागरणं कृत्वा कामिकाव्रतकृन्नरः॥ न पश्यति यमं रौद्रं नैव ग
च्छति दुर्गतिं॥ न पश्यति कुयोनिं च कामिकाव्रतसेवनात्॥ कामिकाया व्रते चीर्णे केवल्यं योगिनो
गताः॥ तस्मात्सर्वप्रयत्नेन कर्तव्या नियतात्मभिः॥ तुलसीप्रभवैः पत्रैर्यो नरः पूजयेद्धरिं॥ न लिप्यते
स पापेन पद्मपत्रमिवांभसा॥ सुवर्णभारमेकं तु रजतं चैव तच्चतुर्गुणं॥ तत्फलं समवाप्नोति तुलसी
दलपूजनात्॥ रत्नमौक्तिकवैडूर्यप्रवालादिभिरर्चितः॥ न तुष्यति तथा विष्णुस्तुलसीदलतो यथा
तुलसीमंजरीभिश्च पूजितो येन केशवः॥ आजन्मपातकं तस्य निश्चयं याति संक्षयं॥ या दृष्टा निखि

ए॰न॰मृ॰
१६

लावसंगपामनी स्वर्गावपुःपावनी रोगानां नाभिवेहितानि रक्षनी सिद्धोलकत्रासिनी ॥ प्रत्यासनिविं
धायिनी भगवतः कृष्णस्य संतोषिता न्यस्तानच्छ्रगे विष्णुक्तिफलदातस्यै नलस्यै नमः ॥ दीपं दत्वा नियो
मस्थो हित्वा गंत्रे हरे दिने ॥ नस्य पुण्यस्य संख्यानं विद्यते भोनवेत्यले ॥ कृष्णाग्रे दीपको यस्य ज्वलत्येका
दशीदिने ॥ पितरस्तस्य तृप्यंति सुवृत्तेन दिविस्थिताः ॥ घृतेन दीपं प्रज्वाल्य तिलतैलेन वा पुनः ॥ प्रयाति स
घं लोके च दीपको हरिणाचितः ॥ सुगंधेन वा प्रेकार्थितः कार्त्तिकामाहात्म्यमपां ॥ पुनो नरैः प्रकर्त्तव्या
सर्वपातकहारिणी ब्रह्महत्यापहारी च भ्रूणहत्याविनाशिनी ॥ वैष्णवस्थानदीक्षी च महापुण्यफल
प्रदा ॥ एकादशीमहात्म्यमेतस्या नरः श्रद्धासमन्वितः ॥ विष्णुलोकमवाप्नोति सर्वपापैः प्रमुच्यते ॥ इ
ति श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे श्रावणशुक्लैकादशीनामाध्यायः ॥ युधिष्ठिर
उवाच ॥ आश्विनस्य सिते पक्षे किंनामैकादशी भवेत् ॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन ॥ श्री
कृष्ण उवाच ॥ शृणुष्वावहितो राजन् कथां पापहरां परां ॥ यस्याः श्रवणमात्रेण वाजपेयफलं लभेत्
द्वापरस्य युगस्यादौ पुरा माहिष्मती पुरे ॥ राजा महीजिदाख्यानो राज्यं पालयति स्वकं ॥ पुत्रहीन
स्य तस्यैव न तद्राज्यं सुखावहं ॥ अपुत्रस्य सुखं नास्ति इहलोके परत्र च ॥ चिंतयानस्य तस्यैव कालो

16

उँ
१६

तोनसंशयः ॥ जनाउवाचः ॥ श्रूयतांनामसंपिधास्यामोवर्वेस्याःग्मकारतां ॥ संवादयद्देहृनायोयनवमाद्वि
जमानताः ॥ पद्ययोनेःपरतरःस्वतःश्रेष्ठोनविद्यते ॥ श्रावणःकार्यवशायमाःसमीपेभवतोवयं ॥ महीं
जितन्नामराजासौपुत्रहीनोत्तिमांप्रतें ॥ वयंतस्यप्रजानृजस्तेनपुत्रवत्यालितास्तथा ॥ तंपुत्ररहितंदृष्ट्वार
तस्यदुःखेनदुःखिताः ॥ तपःकर्तुंसमुद्यतानामतिस्कृत्वानचैवहि ॥ तस्यभाग्येनदृष्टोसिचस्माभिर्द्वि
द्विजोत्तम ॥ महतांदर्शनेनैवकार्यसिद्धिर्भवेन्नृणां ॥ उपदेशंवदस्वनेराजःपुत्रोयथाभवेत् ॥ इतितेषां
वचःश्रुत्वामुहूर्तंध्याननमास्थितः ॥ प्रत्युवाचमुनिस्तेषांतस्यजन्मपुरातनं ॥ लोमशउवाच ॥ पुराजन्म
निवैश्योयंधनहीनोनृशंसकृत् ॥ वाणिज्यकर्मनिरतोग्रामाद्ग्रामांतरंगतः ॥ ज्येष्ठेमासिसितेपक्षे
दशमीदिवसेतथा ॥ मध्यंगतेदिनकरेग्रामसीमनिजलाशयं ॥ कूपिकांसजलांदृष्ट्वाजलपानेमहोद
दधे ॥ सयस्तनःस्वस्तापसंधेनुस्तत्रसमागताः ॥ तदानांनिराराधावैतस्याःसंयुगायींतसा ॥ पिवंतींवार
यित्वातामसौतोयंपपौस्वयं ॥ कर्मणातेनपापेनपुत्रहीनोनृपोभवत् ॥ कस्यापिजन्मनःपुण्यान्प्रा
प्तराज्यमकंटकं ॥ लोकाऊचुः ॥ पुण्यानायांसर्वपानिपुराणेश्रूयतेमुने ॥ पुण्योपदेशंकथयययेर
तपापक्षयोभवेत् ॥ ततःभवत्प्रसादेनपुत्रोभवतिभूपतेः ॥ लोमशउवाच ॥ श्रावणेशुक्लपक्षेतपुत्र

मम विष्णुना ॥ एकादशीव्रतं ये च नराः कुर्वंति चेतनाः ॥ इति श्रुत्वा नमस्कृत्य कृतिमेत्य पुरेवने ॥ य
थाविधिर्यथान्यायं कृतं तैर्जागरान्वितं ॥ तस्य पुण्यप्रभावेण विमले हते नृपनंदनौ ॥ हते पुण्ये पयसा राज्ञी गर्भ
माधत्त शोभने ॥ प्रसवसमकाले सा सुषुवे पुत्रमूर्जितं ॥ श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ॥ द्वादश्यां
वासुदेवाय पवित्रारोपणं स्मृतं ॥ हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः ॥ कुशैः काशैस्तु कार्पासैर्ब्राह्म
णाः कीर्तितैः शुभैः ॥ सोपवासो नरो नक्ते काले सर्वं परिधिवासितं ॥ ब्राह्मणो भोजनं सत्कृत्य कृत्वा पादे पतनाव
नीत मेखला नियोषैः ऊर्ध्वं त्वा जागरणेन ततः ॥ ब्राह्मणान्नि त्रयो वैष्णवान्मित्राः शूद्रास्तथैव च ॥ स्वधर्मानुवर्ति
नः सर्वे मत्पराः ऊर्ध्वैः पवित्रकं ॥ ततः पवित्रं गुरवे दद्याद्वै विधिपूर्वकं ॥ ब्राह्मणेन वैष्णवाः श्रावणे धूपदीपा
दिनार्चयेत ॥ ऋग्वेदादि तिलमंत्रेण प्राहुर्जो विसर्जनं निवेदयेत ॥ शूद्रस्तु मूलमंत्रेण यथाविसर्जनं यथा शिवे ॥
वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं नरैः ॥ भुक्तिः मुक्तिश्च श्रद्धाद्भिः संसारशोकसागरे ॥ न करोति विधानेन
पवित्रारोपणं नरः ॥ तस्य सांवत्सरी पूजा निष्फला वैष्णवस्य तु ॥ श्रुत्वा माहात्म्यमेतस्य नरः पापात्प्र
मुच्यते ॥ इह पुत्रसुखं प्राप्य परत्र स्वर्गतिं लभेत ॥ इति श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे
श्रावणशुक्लापवित्रारोपणी पुत्रदैकादशीनामाध्यायः ॥ ॥ युधिष्ठिर उवाच ॥ भाद्रस्य कृष्णप

उ.अ.ए.
२१

तेन किंनामैकादशी भवेत् ॥ एतदिच्छाम्यहं श्रोतुं कथयस्व जनार्दन ॥ श्रीकृष्ण उवाच ॥ श्रूयतामेक
मना राजन् कथयिष्यामि विस्तरात् ॥ अजेति नामतः प्रोक्ता सर्वपापप्रणाशिनी ॥ अर्चयित्वा हृषीकेशं
व्रतमस्याः करोति यः ॥ पापानि तस्य नश्यन्ति व्रतस्य श्रवणादपि ॥ नातः परतरो राजन् लोकद्वयहितावहै
सत्यमुक्तं मया ह्येतन्नासत्यं मम भाषितं ॥ हरिश्चंद्र इति ख्यातो बभूव पृथिवीपतिः ॥ चक्रवर्ती सत्यसंधः सा
मस्तायाः भुवःपतिः ॥ कस्यापि कर्मणः प्राप्ते राज्यभ्रष्टो बभूव सः ॥ विक्रीतो वनितापुत्रौ स्वयमात्मा
विक्रयी ॥ पुल्कसस्य च दासत्वं गतो राजा स पुण्यकृत् ॥ सत्यमालंब्य राजेंद्र मृतचैलापहारकः ॥ सोऽभव
न्नृपतिश्रेष्ठो न सत्याच्चलितस्तथा ॥ एवं च तस्य नृपतेर्बहवो वत्सरा गताः ॥ ततश्चिंतापरो राजा सब
भूवातिदुःखितः ॥ किं करोमि क्व गच्छामि निष्कृतिर्मे कथं भवेत् ॥ इति चिंतयतस्तस्य मग्नस्य वृजिना
र्णवे ॥ आजगाम मुनिः कश्चिज्ज्ञात्वा राजानमातुरं ॥ परोपकारणार्थाय निर्मितो ब्रह्मणा द्विजः ॥ स
तं दृष्ट्वा द्विजवरं ननाम नृपसत्तमः ॥ कृतांजलिः पुरो भूत्वा गौतमस्याग्रतः स्थितः ॥ कथयामास वृत्ता
न्तमात्मनो दुःखसंयुतं ॥ श्रुत्वा नृपतिवाक्यानि गौतमो विस्मयान्वितः ॥ उपदेशं नृपतये व्रतस्यास्य ददौ
मुनिः ॥ मासि भाद्रपदे राजन् कृष्णपक्षेऽतिशोभना ॥ एकादशी समाख्याता अजा नाम्नेति पुण्यदा ॥ व्र

20

२१

ाऽकृत्वा राजन् पापसंघातैर्भविष्यति ॥ तव भाग्यवशाद्देहा समं मे हि समागता ॥ उपवासमपोभ्
वामाद्यैरागतोऽकृ ॥ एवं मया श्रुते वीर्ये नैव पापं तयो ध्रुवं ॥ तव पुण्यप्रभावेन प्रागतो दृष्टुं पोनम
स्कृत्वैवं कथयित्वा च मुनिरंतरधीयत ॥ मुनिवाक्ये नृपः कृत्वा व्रतमुत्तमं मे ॥ फलेन तस्मिन् व्रतेन रा
ज्ञः पापसंघातो भस्मसमः ॥ अयनो राज्ञ स्वाहेल प्रभावोऽस्य व्रतस्य च ॥ यन्न दुःखं बहुभिर्वर्षैर्भोक्तव्यं
ततयो भवेत् ॥ विशोको रोगी दुःखो राजासीत् व्रतस्यास्य प्रभावतः ॥ पत्न्या सह सुसमासेगं पुत्रजीवनमा
गमः ॥ दिवि दुंदुभयो नेदुः पुष्पवर्षमभूद्दिवः ॥ एकादश्या प्रभावेन प्राप्य राज्यमकंटकं ॥ स्वर्गं लेभे
हरिश्चंद्रः सपुत्रः सपरिच्छदः ॥ ईदृग्विधं व्रतं राजन्ये कुर्वंति मानवाः ॥ सर्वपापविनिर्मुक्तो त्रिदि
वं यांति ते नृप ॥ पठनाच्छ्रवणाद्वापि अश्वमेधफलं लभेत् ॥ इति श्रीपद्मपुराणे उत्तरखंडे उमाप
तिनारदसंवादे भाद्रपदकृष्णाजैकादशी नामाध्यायः ॥ ॥ युधिष्ठिर उवाच ॥ नभस्यस्य सिते
पक्षे किंनामैकादशी भवेत् ॥ को देवः को विधिस्तस्या एतदाख्याहि केशव ॥ श्रीकृष्ण उवाच ॥ ॥
कथयामि महीपाल कथामाश्चर्यकारिणीं ॥ कथयामास यां ब्रह्मा नारदाय महात्मने ॥ नारद
उवाच ॥ कथयस्व प्रसादेन चतुर्मुख नमोस्तु ते ॥ नभस्य शुक्लपक्षे तु किंनामैकादशी भवेत् ॥ पत

उ.न.र.
२२

दिकाम्यहं श्रोतुं विस्तरात्तद्धनायसे ॥ ब्रह्मोवाच ॥ वैस्वतोऽभिमतं श्रोतुं साधु पृष्टं किल त्वया ॥ ना-
तः परतरो लोके पवित्रं हरिवासरात् ॥ पद्मनामेति विख्याता न भक्ष्यैकादशी तिथिः ॥ हृषीकेशः प्रस्व-
पेऽस्यां कर्तव्यं व्रतमुत्तमम् ॥ कथयामि नवायेऽहं कथां पौराणिकीं शुभाम् ॥ यस्याः श्रवणमात्रेण महा-
पापं प्रणश्यति ॥ मांधाता नाम राजर्षिर्विवस्वद्वंशसंभवः ॥ चक्रवर्ती सत्यसंधः प्रतापवा-
न् ॥ धर्मतः पालयामास प्रजाः पौत्रानिवौरसान् ॥ न तस्य दुर्भिक्षं नाधयो व्याधयस्तथा ॥ निरातंका
प्रजास्तस्य धनधान्यसमेधिताः ॥ न्यायेनोपार्जितं वित्तं तस्य कोशे महीपतेः ॥ स्वस्वधर्मप्रवर्तिते
सर्वे वर्णाश्रमास्तथा ॥ कामधेनुसमा भूमिस्तस्य राज्ये महीपतेः ॥ तस्यैवं कुर्वतो राज्यं बहुवर्षगणा-
गताः ॥ अथैकस्मिन्संप्राप्ते विपाके कर्मणः खलु ॥ वर्षत्रयं न विषये न ववर्ष बलाहकः ॥ तेन भग्नाः प्र-
जास्तस्य बभूवुः क्षुधयार्दिताः ॥ स्वाहास्वधावषट्कारवेदाध्ययनवर्जिताः ॥ बभूवुर्विषयास्तस्य भा-
ग्येन दैवपीडिताः ॥ अथ प्रजाः समागम्य राजानमिदमब्रुवन् ॥ प्रजा ऊचुः ॥ श्रोतव्यं नृपशार्दूल प्र-
जानां वचनं त्वया ॥ आपो नारा इति प्रोक्ताः पुराणेषु मनीषिभिः ॥ अयनं भगवतस्तस्मान्नाराय-
ण इति स्मृतः ॥ पर्जन्यरूपो भगवान्विष्णुः सर्वगतः स्थितः ॥ स एव कुरुते वृष्टिं वृष्टेरन्नं ततः प्रजाः

पं
२२

ध्याऽकल्पसेह्यद्ययोगःतेमांयथाभवेत्॥ राजोवाच॥ सत्यमकेवरंहिंसयन्नापिध्यामिहितंकवि
त॥ मुक्तंप्रजायतःपोक्तेमुक्तेसर्वंप्रतिष्ठितं॥ मुक्ताह्यवतिभूतानिजगदेतेनवर्तते॥ इत्येवंश्रूयतेलोके
पुराणेबहुविस्तरे॥ नृपानामपचारेणप्रजानांपीडनंभवेत्॥ नाहंपश्याम्यात्मकृतंदोषंबुद्ध्याविचारय
न॥ तथापिप्रयतिष्यामिप्रजानांहितकाम्यया॥ इतिकृत्वामतिंराजापरिमेयःपरिष्कृतः॥ नमस्कृत्य
विधातारंजगामगहनंवनं॥ चचारमुख्यान्मुनीनाश्रमांस्तापसैर्युतान्॥ ददर्शब्रह्मतनयमृषि
मांगिरसंतपः॥ तेजसाद्योतितदिशोद्वितीयमिवपद्मजं॥ तंदृष्ट्वाहर्षितोराजाप्रवनीयंस्ववाहनात्॥
नमश्चक्रेस्वचरणौकृतांजलिपुटोवशी॥ मुनिरप्यभिनंद्याथस्वस्तिवाचनपूर्वकं॥ पप्रच्छकुशलंराज्ये
सप्तस्वंगेषुभूपतेः॥ निवेदयित्वाकुशलंपप्रच्छानामयंस्वयं॥ दत्तासनोमहीपालोमुनिनास्वयमेवधो
प्रस्तावेनुत्तमःपृष्टोतदागमनकारणं॥ राजोवाच॥ भगवन्धर्मविधिनाममपालयतोमहीं॥ अ
नावृष्टिश्चसंजातानाहंवेद्म्यत्रकारणं॥ संशयच्छेदनायाहमागतोहंतवांतिके॥ योगक्षेमविधानेन
प्रजानांकुरुनिर्वृतिं॥ ऋषिरुवाच॥ एतत्कृतयुगंराजन्युगानामुत्तमंमतं॥ अत्रब्रह्मपरालोकाधर्म
श्चात्रचतुष्पदः॥ अस्मिन्युगेतपोयुक्ताब्राह्मणानेतरेजनाः॥ विषयेतवराजेंद्रवृषलोऽयंतपस्यति॥ परा

स्मात्कारणाद्राजन्न वर्षति बलाहकः ॥ क्रियतां तस्य वधे यत्नो येन दोषः प्रशाम्यति ॥ राजोवाच ॥ नाहमे
नं वधिष्यामि तपस्यन्तमनागसं ॥ धर्मोपदेशं कथय उपसर्गविनाशनं ॥ ऋषिरुवाच ॥ यद्येवं नृपते कु
रुष्वैकादशीव्रतं ॥ नभस्यस्य सिते पक्षे पद्मनाम्नेति विश्रुता ॥ तस्या व्रतप्रभावेन सुवृष्टिर्भविता ध्रुवं ॥ सर्व
सिद्धिप्रदा ह्येषा सर्वोपद्रवनाशिनी ॥ अस्या व्रतं कुरु नृप सप्रजः सपरिच्छदः ॥ इति वाक्यं ऋषेः श्रुत्वा रा
जा स्वगृहमागतः ॥ भाद्रमासे सिते पक्षे पद्माव्रतमथाकरोत् ॥ प्रजाभिः सह सर्वाभिश्चातुर्वर्ण्यैः सम
न्विताः ॥ एवं व्रते कृते राजन्प्रववर्ष बलाहकः ॥ जलेन प्लाविता भूमिरभवत्सस्यशालिनी ॥ ऋषी
श्वरप्रसादेन लोकाः सौख्यं प्रपेदिरे ॥ एतस्मात्कारणाद्देव कर्तव्यं व्रतमुत्तमं ॥ दृष्टा धनवते नृणां तत
मुक्तिं च देहिने ॥ बहु संवेद्यते रत्नाकरोपासमं भवेत् ॥ नमो नमस्ते गोविन्द बुधश्रवणसंज्ञकः ॥ अघौघ
संक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥ भुक्तिमुक्तिप्रदश्चैव लोकानां सुखदायकः ॥ पठनाच्छ्रवणाद्वापि
सर्वपापैः प्रमुच्यते ॥ इति श्रीपद्मपुराणे उत्तरखण्डे उमापतिनारदसंवादे भाद्रपदशुक्लापद्मैकाद
शीनामाध्यायः ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन ॥ इषस्य कृ
ष्णपक्षे तु किं नामैकादशी भवेत् ॥ श्रीकृष्ण उवाच ॥ आश्विने कृष्णपक्षे तु इन्दिरा नाम नामतः ॥ न

अस्या व्रतप्रभावेन महापापं प्रणश्यति ॥ अधोयोनिगतानां च पितॄणां गतिदायिनी ॥ शृणुष्वावहितो
राजन् कथां पापहरां परां ॥ यस्याः श्रवणमात्रेण वाजपेयफलं लभेत् ॥ पुराकृतयुगे राजन्बभूव रि
पुसूदनः ॥ इंद्रसेन इति ख्यातो पुरा माहिष्मतीपतिः ॥ स राजा पालयामास धर्मेण यशसान्वितः ॥ पु
त्रपौत्रसमायुक्तो धनधान्यसमन्वितः ॥ माहिष्मत्यधिपो राजा विष्णुभक्तिपरायणः ॥ जपन् गोविं
दनामानि मुक्तिदानि नराधिपः ॥ कालेन यापितं विधिवदध्यात्मध्यानचिंतकः ॥ एकस्मिन् दिवसे राज्ञि
सुखासीने सदोगते ॥ अवतीर्य्याथ गगनात्तत्रैवागान्नारदो मुनिः ॥ तमागतमभिप्रेक्ष्य प्रत्युत्थाय कृतां
जलिः ॥ पूजयित्वा च विधिवत्तत्रासने संन्यवेशयत् ॥ सुखोपविष्टं मुनिं प्रत्युवाच नृपोत्तमः ॥ राजो
वाच ॥ त्वत्प्रसादान्मुनिश्रेष्ठ सर्वत्र कुशलं मम ॥ अद्य क्रतुः क्रियाः सर्वाः सफलानि तवदर्शनात् ॥ प्रसा
दं कुरु देवर्षे ब्रूहि नामागमकारणं ॥ नारद उवाच ॥ श्रूयतां नृपशार्दूल मद्वचो विस्मयप्रदं ॥ ब्रह्मलोकाद
हं प्राप्तो यमलोकं नृपोत्तम ॥ यमेन नार्चितो भक्त्या उपविष्टो वरासने ॥ धर्मशीला सत्यवंतो भास्करिं स
मुपासते ॥ बहुपुण्यप्रकर्त्तारो तेन वै कल्पदोषतः ॥ सभायां श्राद्धदेवस्य मया दृष्टः पिता तव ॥ काप्यर
नस्तेन संदेशस्तं निबोध जनेश्वर ॥ इंद्रसेन इति ख्यातो राजा माहिष्मतीपतिः ॥ तस्याग्रे कथय ब्रह्मन्र

स्थिते मां यमसन्निधौ ॥ केनापि चांतरायेण सर्वं जन्मार्जितं च ॥ स्वर्गं गताय मां पुत्र इंदिरापूजयानतः
इत्युक्तोऽहं समायातः समीपं तव पार्थिव ॥ पितृस्वर्गकृते राजन् निरिंदिराव्रतमाचर ॥ राजोवाच ॥ कथ
यस्व प्रसादेन भगवन् निरिंदिराव्रते ॥ विधिना केन कर्तव्यं कस्मिन्पक्षे तिथौ तथा ॥ नारद उवाच ॥ शृणु
राजेंद्र वक्ष्येऽहं व्रतस्यास्य विधिं शुभं ॥ आश्विनस्यासिते पक्षे दशमीदिवसे शुभे ॥ प्रातः स्नानं प्रकुर्वी
त श्रद्धायुक्तेन चेतसा ॥ ततो मध्याह्नसमये स्नानं कृत्वा समाहितः ॥ एकभक्तं ततः कुर्यात्त्रौ भूमौ श
यीत च ॥ प्रभाते विमले जाते प्राप्ते चैकादशीदिने ॥ मुखप्रक्षालनं कुर्याद्दंतधावनपूर्वकं ॥ उपवास
स्य नियमं गृह्णीयाद्भक्तिभावितः ॥ अद्य स्थित्वा निराहारः सर्वभोगविवर्जितः ॥ श्वो भोक्ष्ये पुंडरीकाक्ष
शरणं मे भवाच्युत ॥ इत्येवं नियमं कृत्वा मध्याह्नसमये तथा ॥ शालग्रामशिलाग्रे तु श्राद्धं कुर्याद्य
थाविधि ॥ पितॄणां प्रीतये श्राद्धं कुर्याच्छ्रद्धासमन्वितः ॥ गोधूममहाणी यत्नाहेकृतं मेधं कृतं भवेत
यवैर्व्रीहितिलैर्मौद्गैर्लाजैश्च शाकैस्तथा ॥ श्राद्धं कृत्वान्नयो विप्रान्भुक्ते पितृसेवितं ॥ स्वनाम्नितानि
पापानि तयाद्देत वासरे ॥ शालग्रामो जपेद्राजन् दक्षिणाभिश्च सज्जितान् ॥ पिंडमंत्रं समाघ्राय गा
वे दद्याद्विचक्षणः ॥ पूजयित्वा हृषीकेशं धूपगंधादिभिस्तथा ॥ रात्रौ जागरणं कुर्यात्केशवस्या

समीपतः॥ ततः प्रभातसमये प्राप्ते वै द्वादशीदिने॥ पूर्वं विप्रान् हरिं भक्त्या भोजयित्वा द्विजोत्तमा॥ वेधुहेतो द्विजश्रेष्ठाय स्वयं भुंजीत वाग्यतः॥ अनेन विधिना राजन् कृतव्रतमनेदिने॥ विमले लोके यथा स्यात्तेषि नरसत्तम भूपते॥ इत्युक्त्वांतरधीयत मुनिरंतरधीयत॥ यथोक्तविधिना राजन्न चकार व्रतमुत्तमं॥ तेन तुष्टेन सहितः पुत्रभृत्यसमन्वितः॥ कृते व्रते तेन कौंतेय पुष्पवृष्टिरभूद्दिवि॥ ततो विमानमारुह्य तेन गाम हरिमंदिरं॥ इंद्रसेनोपि राजर्षिः कृत्वा राज्यमकंटकं॥ राज्ये निवेश्य तनयं जगाम त्रिदिवालयं॥ इंदिराव्रतमाहात्म्यं मया ते कथितं मया॥ पठनात् श्रवणाद्राजन् सर्वपापैः प्रमुच्यते॥ इति श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे आश्विनकृष्णैकादशी इंदिरानामाध्यायः॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन॥ इषमासस्य शुक्लपक्षे तु किं नामैकादशी भवेत्॥ श्रीकृष्ण उवाच॥ श्रूयतां राजेंद्र वक्ष्यामि माहात्म्यं पापनाशनं॥ शुक्लपक्षे चाश्विनस्य भवेत्तु एकादशी तु या॥ पापांकुशेति विख्याता सर्वपापहरा परा॥ पद्मनाभाभिधानं सा पूजयेत्तत्र मानवः॥ सर्वाभीष्टफलप्राप्त्यै स्वर्गमोक्षफलं नरः॥ तपस्तप्त्वा नरैस्तीव्रं चिरं सुनियतेंद्रियैः॥ यत्फलं समवाप्नोति तन्नत्वा गरुडध्वजं॥ कृत्वापि बहुशः पापं नरो मोहसमन्वितः॥ न याति नरकं नत्वा सर्वपापहरं हरिं

उ.अ.र.
२९

पृथिव्यां याति नीचैर्लिप्यते तन्मालिन्ये च ॥ नालिसर्वोणपगमेनालिविस्मानामानुकीर्तनात्
देवेषाई॰धरेविस्रेयेप्रपनाञ्जनाईने ॥ ननेधोयमलोकस्यपालनाज्ञायवेकेवित ॥ उपोद्घेकारस्यो
मेकोप्रसंगेनापिमानवः ॥ नयातिपातनांयामीपापंकृत्वापिदारुणं ॥ वैस्मवःपुरुषोभूत्वाविस्म
विंदंकरोतिचेन ॥ गौरवेपद्मनेचोरेयावर्हिसावल्हईप्राः ॥ नेहयोपापवनेकिंचिनाउपलोकेपुविपते
याहशेपत्न्नाभस्यवेतेपातकनाशने ॥ नायन्यापापलिरेहेस्मिन्नुतिस्रुतिमन्त्राधिप ॥ यावञ्चो
पवसेनजंतुःपद्मनाभहरिंप्रभुं ॥ सुस्थमेधसहस्राणिराजसूयशतानि च ॥ एकादश्युपवास
स्यफलेनार्हतिषोडशीं ॥ एकादशीसमंकिंचित्पुण्यंलोकेनविद्यते ॥ आजेनापिकृतावैस्य
नेनेयोतिहिभास्करि ॥ स्वर्गमोक्षप्रदाह्येषाशरीरारोग्यदायिनी ॥ सुकलत्रप्रसौषाधनमित्रप्र
दायिनी ॥ नगंगानगयाराजन्नकाशीनचपुष्करं ॥ नचापिकौरवंक्षेत्रंपुण्यंभूपहरेर्दिनात ॥ ना
रीजागरणंकृत्वासमुपोष्यहरेर्दिने ॥ सुनाधासेन भूपालप्राप्नोतिवैष्णवंपदं ॥ दशौवमातृकेप
क्षेराजेंद्रपैतृके ॥ प्रियायाश्चापितेनपुरुषानुद्धरेन्नरः ॥ नवर्ष्यजारिस्यरूपान्गाभिकनके
न. ननाः ॥ सांख्ययोगःपीनवसावप्रयांतिस्नहरिमंदिरे ॥ वालवेयोवनेवेवृद्धत्वेचनरोत्तमः ॥ उपोष्ये

28

गं
२९

...रं शीतनूनं नैव यान्ति दुर्गतिं ॥ पापांकुशाख्यां यो येव प्राप्स्ति न स्यमि ने नरः ॥ सर्वे पापविनिर्मुक्तो ह
रिलोकं स गच्छति ॥ दत्वा हेम तिलान्भूमिं गामन्नमुदकं तथा ॥ उपानच्छत्रवस्त्रादीन्पुण्यानि यमं न
रः ॥ सर्वे पापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ यस्य पुण्यविहीनानि दिनान्यायांति यांति च ॥ स लो
हकारभस्त्रेव श्वसन्नपि न जीवति ॥ पुत्रं श्वेतेहि वंसं रूपाहरिष्टोपनृपोत्तम ॥ सरीरचवनृपछाशाकिस्ताव
सनविनक्रियाः ॥ होमस्नानजपध्यानसत्यादिपुण्यकर्मतां ॥ कर्तारो नैव पश्यन्ति ज्ञो रौरवे यमपा
तनां ॥ दीर्घायुषो धनाढ्याः कुलीना रोगवर्जिताः ॥ हूपचेनेमानवाः लोके पुण्यकर्तार ईहशाः ॥ किमत्र
बहुनोक्तेन यान्त्यधर्मेण दुर्गतिं ॥ आरोहंति दिवं धर्मैर्नात्र कार्या विचारणा ॥ इति ते कथितं राजन्
यत्पृष्टोहं त्वयानघ ॥ पापांकुशाया माहात्म्यं किमन्यच्छ्रोतुमिच्छसि ॥ इति श्रीपद्मपुराणे उत्तरखंडे
उमापतिनारदसंवादे युधिष्ठिरकृष्णसंवादे पापांकुशैकादशी नामाध्यायः ॥ युधिष्ठिर उवाच ॥ कथयस्व प्रसादेन
मयि स्नेहाज्जनार्दन ॥ कार्तिकस्यासिते पक्षे किंनामैकादशी भवेत् ॥ श्रीकृष्ण उवाच ॥ श्रूयतां रा
जशार्दूल कथयामि तवाग्रतः ॥ कार्तिके कृष्णपक्षे तु रमा नाम सुशोभना ॥ एकादशी समाख्याता
महापापहरा परा ॥ अस्याः प्रसंगतो राजन्माहात्म्यं प्रवदामि ते ॥ मुचकुन्द इति ख्यातो बभूव नृप

उ.मा.र.
३१

तिःपुरा ॥ देवेंद्रेण समं तस्मात्त्रिजगत्सम भवन्नृप ॥ यमेन वह्निसोनैव कृत्वे देवता विसर्जयेत्तः ॥ विभीषणो
नयत्येष सर्वविम्नमभवन्नृप ॥ विस्मृभक्तः सत्यसंधो धर्मवृत्तवतीं पुरा ॥ तस्यै चत्वारः सतो राजन्नराज्ये
निहतकेरूलं ॥ वभूव इह तेनाये हेवेंदुभागमासरिद्धा ॥ शोभनाय च सा धन्ना वैदुसेन महनायवै ॥ सकदा
चिन्मायातः श्वसुरस्य गृहे नृप ॥ एकादशी व्रतदिने समायातानस्य पुष्पदे ॥ समागते व्रतदिने चंद्रभा
गाव्रविन्तयत् ॥ किंभविष्यति देवेश मम भर्ता सुदुर्बलः ॥ क्षुधां नसहते सोहं पिता वै ग्रोपशासनः ॥
पटहस्ताड्यते यस्य संप्राप्ते दशमीदिने ॥ न भोक्तव्यं न भोक्तव्यं न भोक्तव्यं हरेर्दिने ॥ श्रुत्वा पटहनिर्घोषं
शोभनस्त्वब्रवीत्प्रियां ॥ किं कर्तव्यं मया कांते देहि शिक्षां वरानने ॥ चंद्रभागोवाच ॥ मत्पितुर्वेश्मनि
प्रभो भोक्तव्यं नाद्यकेनचित् ॥ गजैरश्वैस्तु कर्त्तव्यं भैरन्यैः पशुभिरेव च ॥ तृणमन्नं न दात्याति न भोक्तव्यं
हरेर्दिने ॥ मानवैस्तु कुतः कांत भुज्यते हरिवासरे ॥ यदि त्वं भोक्ष्यसे कांत ततो निंद्यो भविष्यसि ॥ एवं विचा
र्य मनसा सुदृढं मानसं कुरु ॥ शोभनउवाच ॥ सत्यमेतत्त्वया प्रोक्तं करिष्येहमुपोषणं ॥ दैवेन विहि
तं यच्च तन्नवै अन्यथा भविष्यति ॥ इति दृढमतिः कृत्वा व्रतकारी नियमे व्रती ॥ क्षुधयापीडितश्च तनुस्सवव्यथा
भेदुःखिता ॥ इति चिंतयतस्तस्य सूर्यो ह्यस्तमगात्किरे ॥ वैष्णवानां नराणां सा रात्रिः पापहर्षविवर्द्धनी ॥

३०

उ.
३१

इति स्नात्वा तानां च नागराः सह कृष्णेन सो ॥ गच्छं च नृप शाहूल शोभन स्याति दुःखिना ॥ स्वे हि हर्षवेला
यां शोभनः पंचतां गतः ॥ राज्ञ्या भासया जाते राजयोग्ये श्व दारुभिः ॥ देहं भानानात्म देहे हृ दद्या हृ पति
ना सह ॥ कृत्वौर्ध्वदेहिकं तस्य न स्थौ न नकं वेश्मनि ॥ शोभन श्च नृप श्रेष्ठ रंभा व्रत प्रभावतः ॥ आमोदे
वपुरे रम्ये मंदराचलसानुनि ॥ प्राप्त वान नमनाभाध्यमसंख्येयगुणान्वितं ॥ हेम स्तंभमयैः सौधैः रत्नवै
दूर्यमंडितैः ॥ स्फाटिकैः विविधाकारैः विचित्रैः रूपशोभितैः ॥ सिंहासन समारूढः सच्छत्र चामरैः ॥
किरीट कुंडलयुतो हारकेयूरभूषितः ॥ स्तूयमानश्च गंधर्वैः रप्सरोगण सेवितः ॥ शोभनः शोभने पं
वत्राजो परो यथा सोमशर्मेति विख्यातो मुचकुंद पुरे भवन् ॥ तीर्थयात्रा प्रसंगेन भ्रमन् विप्रोऽदद
र्शतं ॥ नृपजामातरं ज्ञात्वा तत्समीपं जगाम सः ॥ शोभनोपि नरं ज्ञात्वा शोभशर्माणमागतं ॥ आस
नादुत्थितं श्रीवं नमश्च केतुहिजोत्तमे ॥ चक्रार कुशलप्रश्नं श्वशुरस्य नृपस्य च ॥ कांतया चंद्रभागाया
नचैव नगरस्य च ॥ सोमशर्मोवाच ॥ कुशलं वर्तते राजन् श्वश्रू श्वशुर्योर्विपने भुवे ॥ अवि विचित्रं विर
मया ॥ शोभन उवाच ॥ कार्तिकस्यासिते पक्षे या नाम्नैकादशी मता ॥ नाम्ना यो च्यमया प्राप्ते हिजे ।

इ०न०

दुपदमीदृशं ॥ मयैतन्मे हि हितं विप्र ग्रहाही नेत्रयोनमे तेनाहं मधुरं मनो प्युवं भवतिनस्पृलं ॥ मत्तु
ञ्जेरम्यं इह नावं इभागास्य सेो भन्न ॥ नमैकथ्यपस्यनीतं वं इभागाप्रतो द्विजा ॥ सोम स्यमेवाच ॥
पन्यांहं रं येनः कांनरुन वहं ह्मोम यग्युभे ॥ इद्रुनल्पमनाधप्रेहूं हेनसप्रेमया ॥ अप्युं वं नेनन स्योकेः
प्युं वं भवतिननउरू ॥ वेइभागोग्यावं ॥ तत्र मांनयविप्रर्षीणातिरपीणल्मालस्या ॥ स्वास्मनो ग्रन्तपुण्य
नकरिष्यामि पुंरंप्युवे ॥ प्रावयो द्विज संयोगो य ग्याभवतिननउरू ॥ प्राप्यनेहि मन्हलगुण्यं पंस्कनाया
गेविपुत्मयोः ॥ इतिश्रुत्वा सहतया सोमशर्मेनगामहं ॥ गुरुश्रयं गाम रेवस्य मंदरागवलमतिये
रुपिमंत्रयभावेन विस्मृतोमतरसेवमात ॥ हिंस्यद्रावभूगासो हिंयागतिर्भगायहं ॥ पंनु मः समीपः
मगामन्यहं वोन्फलन्मोवनः ॥ अहं वं गोभनोत्नीवहं ह्म कोतोममामनो ॥ समाहूयसकेगामेपा
शैतो सम्यवेगयत ॥ पुण्येगागविपंहबीवं इभागाग्रिभेवतः ॥ श्रुत्वा कोन हिते याकं यस्तुगपवि
यतेमयि ॥ ग्रहवबोधिकाज्ञाना यरा हं पितृवेयमति ॥ ननः प्रभृतिपद्मीणां मयावैकारणी अने
नेनपुण्यप्रभावेन भविष्यतिपुंरंप्युवं ॥ सर्वेकामसमहेवयावराहूनसंप्लवं ॥ पवंमानृपयाहूंल
रमनेपतिनामहं ॥ हिंस्यान्मोगानरिष्यहृपादिष्याभरणभूषिता ॥ योभनोपिनयासाहंरमः

नेहास्ति विग्रहः ॥ रमाव्रतप्रभावेन मे दत्तं वलसान्वितं ॥ चिंतामणिसमा ह्येषा कामधेनुसमा यथा
रमाभिधाना नृपते तवाग्रे कथिता मया ॥ तस्या माहात्म्यमनघ श्रुत्वा सर्वेषु यान्नृप ॥ मया तवा
ग्रे कथितं माहात्म्यं पापनाशनं ॥ एकादशीव्रतानां च पक्षयोरुभयोरपि ॥ यथा शुक्ला तथा कृष्णा विभे
दं नैव कारयेत् ॥ सा विबैनैकादशी नृणां भुक्तिमुक्तिप्रदायिनी ॥ धेनुः श्वेता तथा कृष्णा उभयोः सदृशं
पयः ॥ तथैव तुल्यफलदं स्मृतमेकादशीद्वयं ॥ एकादशीव्रतानां यो माहात्म्यं शृणुते नरः ॥ सर्व
पापविनिर्मुक्तो विष्णुलोके महीयते ॥ इति श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे का
र्तिककृष्णरमैकादशीनामाध्यायः ॥ युधिष्ठिर उवाच ॥ श्रुतं रमाया माहात्म्यं ततः कस्य यथा
नघे ॥ कार्तिके शुक्लपक्षे या तां मे कथय मानद ॥ श्रीकृष्ण उवाच ॥ शृणु राजन्प्रवक्ष्यामि शुक्ले कार
वो जरदलेनया ॥ साधयामास देवेशं ब्रह्माणं लोककर्त्तारं ॥ नारद उवाच ॥ प्रबोधिन्यास्तु माहा
त्म्यं [illegible] वद विस्तरतो मम ॥ यस्यां जागरणं विशेषेण अनेकशः ॥ ब्रह्मोवाच ॥
प्रबोधिन्यास्तु माहात्म्यं पापघ्नं पुण्यवर्द्धनं ॥ मुक्तिप्रदं सुबुद्धीनां शृणुष्व मुनिसत्तम ॥ तावद्गर्जंति ती
र्थानि समुद्रसरांसि च ॥ यावन्न बोधिनी विष्णोस्तिथिः प्राप्नोति कार्तिके ॥ तावद्गर्जंति विप्रेंद्र
गंगाभागीरथी क्षितौ ॥ यावन्नायाति पापघ्नी कार्तिके हरिबोधिनी ॥ अश्वमेधसहस्राणि राज

उ.खं.र.
३९

स्वयं प्राप्तानि च ॥ एकेनैवोपवासेन प्रबोधिन्यां लभेन्नरः ॥ यद्दुर्लभं यदप्राप्यं त्रैलोक्ये सचराचरे
चे ॥ नरः पित्रार्थितं तु ददाति हरिबोधिनी ॥ ऐश्वर्यं संपदं प्रज्ञां राज्यं च सुखसंपदः ॥ ददाति पोषि
नाभक्ताजनेभ्यो हरिबोधिनी ॥ मेरुमंदरमात्राणि पापान्युक्तानि यानि च ॥ एकेनैवोपवासेन दह
ते पापवलासिनी ॥ पूर्वजन्मसहस्रेषु यत्पापं समुपार्जितं ॥ निशि जागरणात्तस्या दहते तूलराशि
वत् ॥ उपवासं प्रबोधिन्यां यः करोति स्वभावतः ॥ विधिवत्स निशां हूं लगते यथोक्तं फलं भवेत्फलं ॥ यथो
क्तं कुरुते विधिवत्स्नानं कृतं नरः ॥ स्वल्पं कृतं च विधिवच्छ्रेष्ठं मेरुतुल्यं भवेत्फलं ॥ विधिहीनेन यः
कर्म स्वल्पं कृतं मेरुमात्रके ॥ अणुमात्रं न चाप्नोति फलं धर्मस्य नारद ॥ ये ध्यायंति मनोहत्वा ये
करिष्यंति बोधिनीं ॥ वसंति पितरो हृष्टा विष्णुलोके महीपते ॥ विमुक्ता नारकैर्दुःखैः यांति विष्णोः
परं पदं ॥ कृत्वानपानकेवारं ब्रह्महत्यादिकं नरः ॥ कृत्वा जागरणं विष्णोर्धौतपापो भवेन्नरः ॥ दुःप्रा
प्यं यत्फलं विप्र अश्वमेधादिकैर्मखैः ॥ प्राप्यते नन्सुखेनैव प्रबोधिन्यां तु जागरे ॥ स्नात्वा सर्वतीर्थे
षु दत्वा कोटिं गवां मही ॥ तत्फलं समवाप्नोति यत्कृत्वा जागरं हरेः ॥ स्नातः स एव सुकृती कुलं तेने
व पावितं ॥ कार्तिके तु निशाई ल कृता येन प्रबोधिनी ॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥
यथा ध्रुवं मृत्युर्मर्त्यधनं च यथा ध्रुवं ॥ इति सत्यं नारदाद्यैर्मुनिश्रेष्ठैः कथितं च महर्षिने ॥ यानि कानिच

गं
३९

वती यो नित्यं लोके संभवेतिच ॥ तावन्नगर्जति मेरुसमः कृ यः करोति प्रबोधिनी ॥ विंनस्यवडभिः पुण्यै
कृता येन प्रबोधिनी ॥ पुत्रपौत्रप्रदा ह्येषा कार्तिके हरिबोधिनी ॥ सत्तानीव सर्वा गीवसनपत्नी वि र
वैद्विषः ॥ मामेमेरुसुवर्णं तस्या स्ति उपालेहरिबोधिनी ॥ त्रिमेधाः प्रियवनितोत्यथ सेसार सद्वायेनी
यः करोति नरो भक्त्या मुक्तिभाक्स भवेन्नरः ॥ प्रबोधिनी कृपा छिन्ना गर्भे न विशते नरः ॥ सर्वधर्मोन्व
त्त्यत्यनस्मानऊर्वेनवारद ॥ कर्मणा मनसा वाचा पापं यत्समुपार्जितं ॥ ततकलयति गोविंदः प्र
बोधिन्यां तु जागरे ॥ स्नानं दानं जपो होमः समुद्दिश्य जनार्दनं ॥ नरो यत्कुरुते तत्स्यात्प्रबोधिन्यां तदक्ष
यं ॥ ये व्रतं तेन रातनस्या भक्त्या देवे च माधवे ॥ सर्वपापप्रमुक्तास्ते पापैः सैः शतजन्मजैः ॥ महाव्रत
मिदं पुत्र महापापौघनाशनं ॥ प्रबोधवासरे विष्णोर्विधिवत्समुपोषितं ॥ अनेनानेन देवेशं पारितो
ष्य जनार्दनं ॥ विराजयन्दिशः सर्वाः प्रयाति हरिमंदिरं ॥ कन्येवोपायधन्येन नरैः कांतिधनार्थिभिः
बाल्ये यत्समविंचेपापं यौवने वार्धके तथा ॥ पातकं समरूतं पापं स्वल्पं वा यदि वा बहु ॥ ततत्कालय
तिगोविंदस्य स्यामम्यर्चितो नृणां ॥ धनधान्यवहा पुण्या सर्वपापहरा परा ॥ तामुपोष्य हरेर्भोक्ता
दुर्लभं न भवेत्क्वचित ॥ वेदस्यैवोपनागेषु यन्मन्मेप्राकीर्तितं ॥ तस्माद्भक्त्या तत्कं प्रबोधिन्यां ।

प्रजागरे ॥ स्नानं दानं जपो होमः स्वाध्यायोऽभ्यर्चनं हरेः ॥ तत्सर्वं कोटिगुणितं प्रबोधिन्यां हि तत्त
थैव ॥ जन्मप्रभृति यत्पुण्यं नरेणोपार्जितं भवेत् ॥ वृथा भवति तत्सर्वं न कृत्वा कार्त्तिके व्रतं ॥ पर
कृत्वा नियमं विप्रा कार्त्तिके यः त्यजेन्नरः ॥ न जन्मार्जितपुण्यस्य फलं प्राप्नोति नारद ॥ तस्मात्सर्व
प्रयत्नेन देवदेवं जनार्दनं ॥ उपसेवेत विप्रेंद्र सर्वकामफलप्रदं ॥ परान्नं वर्जयेद्यस्तु कार्त्तिके विष्णु
तत्परः ॥ परान्नवर्जनाच्चैव चांद्रायणफलं लभेत् ॥ विना शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः ॥ सर
हेत्स्वं पापानि यज्ञायुतफलं लभेत् ॥ न तथा तुष्यते यज्ञैर्न दानेन जपादिभिः ॥ यथा शास्त्रकथा
लापैः कार्त्तिके मधुसूदनः ॥ ये कुर्वंति कथां विप्रा ये शृण्वंति शुभान्विताः ॥ श्लोकार्धं श्लोकपादं
वा कार्त्तिके गोशतं फलं ॥ सर्वधर्मान्परित्यज्य कार्त्तिके केशवाग्रतः ॥ शास्त्रावतारं कार्यं श्रोत
व्यं च महामुने ॥ श्रेयसां लोभबुद्ध्या वा यः करोति हरेः कथां ॥ कार्त्तिके मुनिशार्दूल कुलानां तारयेत्
शतं ॥ नियमेन नरो यस्तु शृणुते नित्य वैष्णवीं कथां ॥ कार्त्तिके तु विशेषेण गोसहस्रफलं लभेत् ॥ प्र
बोधवासरे विप्राः शृणुते यो हरेः कथां ॥ सप्तद्वीपवतीदानेन तत्फलं लभते मुनिः ॥ श्रुत्वा वि
ष्णुकथां विप्रा ये चैव यतिकराति ये ॥ स्वशक्त्या पूजयेत्सम्यक् तेषां लोकाः सनातनः ॥ गीतशास्त्रवि

मे
छ॰

नारी च कार्त्तिके यो नयेन्नरः ॥ न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय ॥ गीतं नृत्यं च वाद्यं च भक्त्या विष्ण
कथां मुने ॥ यः करोति स पुण्यात्मा त्रैलोक्योपरि संस्थितः ॥ बहुपुष्पैश्च ह्रफलैः कर्पूरागरुकुंकुमैः ॥ ह
रेः पूजा विधातव्या कार्त्तिके बोधवासरे ॥ यस्मात्तुल्यसमं सर्व्वं ते प्राप्यते मुनिसत्तमः ॥ फलैर्नानावि
धैर्नैवेद्यैः प्रबोधिन्यां तु जागरे ॥ नारिकेलाद्यैः समाधाय पुष्पैर्देवाय जनार्दने ॥ यत्फलं सर्व्वतीर्थेषु सर्व्वदाने
षु यत्फलं ॥ तत्फलं कोटिगुणितं दत्वाद्वै बोधवासरे ॥ गुरुं पूजयेन्नरः ऊर्णाभोजनाच्छादनादिभिः ॥ दर
त्तिणाभिश्च देवेशं तस्यैव कृपानिधिः ॥ भागवते श्रुणुते यस्तु पुराणं चापरेन नरः ॥ प्रयान्तं भवेन्ना
न सप्तकपिलादानं फलं ॥ कार्त्तिके मुनिशार्दूल सर्वपापक्षयावैकुण्ठं व्रजेत् ॥ यः करोति यथोक्तं तु मंत्रैः किल
स्मृतिसंयुतः । केनशापकपतेन संजितो नरकं वधतः ॥ ममास्य हृदये सम्यक् प्रीतो भवति मधुसूदनः ॥ प्र
कार्त्तिके सप्तमे ह्येनो जागरणं नारदे ॥ ह्येतेनानन्तरे देवं न रत्नाकामिप्राप्नोति ॥ मुनिपुष्पार्चितो विष्णुः
कार्त्तिके पूजयेत्तु यः ॥ ह्रासत्यमिमिनान्काम मा पापि संयुगे दृष्टा ॥ विहाय सर्वपुष्पाणि मुनिपुष्पे
न केशवे ॥ कार्त्तिके यो वैष्णवे ह्यर्च्या वाजिमेधफलं लभेत् ॥ नलसीदलानि पुष्पाणि ये यच्छंति जनार्
दने ॥ कार्त्तिके सकलं वत्स पापं जन्मायुतं दहेत् ॥ दृष्टा स्पृष्टाथवा ध्याता कीर्तिता नामतः स्तुता ॥ रो

उ.ख.प.
५२

पितासंहितानोनित्यं यज्ञजितानतुलसीतता ॥ नयथा तुलसी भक्तिर्ये कुर्वंति दिने दिने ॥ युगकोटिसह
स्राणि तन्वंति सुकृतं नरा ॥ यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैर्मुने ॥ रोपिता तुलसी पुंभिर्वर्द्ध
ते वसुधातले ॥ तेषां वंशे तु ये जाता ये भविष्यंति ये गताः ॥ आकल्पयुगसाहस्रं तेषां वासो हरेर्गृहे ॥ य
त्फलं सर्वपुष्पेषु सर्वपत्रेषु नारद ॥ तुलसीदलेन वै केन कार्त्तिके प्राप्यते जन ॥ संप्राप्ते कार्त्तिके दृष्टा नि
पमनंतनारदेनः ॥ एकनीयो मया चिसृक्ता मनेनैतं तुलसीदलैः ॥ दृष्टाक्रन्तशतैर्दयान्न दत्वा दानान्यनेक
पाः ॥ तुलसीदलैस्तु तन्मूल्यं कार्त्तिके केशवार्च्चने ॥ इति श्रीपद्मपुराणे उत्तरखंडे ऽध्यायतिनारदस
वादे कार्त्तिकेयज्ञे कार्त्तिकीनामाध्यायः ॥ ११ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन् श्रोतुमिच्छामि त्वत्तो नाना
सुतमंडले ॥ सर्वपापहरं विष्णोः फलदं प्रतिनोचयन ॥ पुरुषोत्तममासस्य कथा शुद्धिजनार्दन ॥ को
विधिः किंफलं तस्य को देवस्तत्र पूज्यते ॥ अधिमासे च संप्राप्ते ब्रूहि जनार्दन ॥ कस्य दानस्य किं पु
ण्यं किं कर्तव्यं त्वमिः प्रभो ॥ कथं स्नानं च किं जाप्यं कथं पूजा विधिस्मृतः ॥ किं भोज्यमत्र मे वाञ्छा मासे
स्मिन्पुरुषोत्तमे ॥ श्रीकृष्ण उवाच ॥ कथयिष्यामि राजेंद्र भवतः स्नेहकारणात् ॥ पुरुषोत्तममासस्य
माहात्म्यं पापनाशनं ॥ अधिमासेन संप्राप्ते भवेद्देकादशी न या ॥ कमला नाम सा नाम्ना ख्याते यीना

पं
५२

38

उ.खं.ए.
५२

40

ते ज्ञाना वैकुंठद्वारं ह्यसागता ॥ ये विना देवदेवेन कमलाघः प्रभावतः ॥ पुत्रहीना नसमासस्याया पते
प्रश्नमेभवेत् ॥ तस्मात्तनेवयाचीर्णं प्रयागे कृत्तिसंनिधौ ॥ अनस्यास्य प्रभावेन वपागाहं नसंशयः
नवंशोभविष्यतिमानवाहिजसत्तमः ॥ मत्समाराद्दृया यंतिसन्वेते श्राहूतेमया ॥ श्रात्वाणाजवा
व ॥ प्रसन्नय हरिमेप श्रेयस्तद्वितिस्तरनोगदे ॥ यत्कथा स्नग्नवर्तते माधवोदेवजनार्दनः ॥ लक्ष्मीकृपा
व ॥ श्रोतव्यं परमे श्राद्धं पविद्याणमनुत्तमं ॥ दुःखप्रनाशनं पुण्यं श्रोतव्यं यत्नतनतः ॥ उत
मः श्रुत्वा या पुत्रकः श्लोकाश्लोकार्द्धमेववा ॥ पति ब्रान्स्यतेमययो मह्यापातककोटिभिः ॥ मासमानां
परमोमासः पत्नीशणं गरुडेयथा ॥ नदीनां च यथा गंगा तिथीनां द्वादशी तिथिः ॥ यथा पितिजेराः
सर्वे भारते जन्मलिप्सवः ॥ न तद्वेषं तिथिविधानारायणमनामयं ॥ ये प्रयजंति सततं भक्त्या देवं नारा
यणं प्रभुं ॥ नानवेषं तिसननेषलाया देवतानाणाः ॥ ये पिनामपरापेवहत्रीकीर्त्तनेननतत्परः ॥ हरि
मन्नापराधेनेकनाशाः कलौयुगे ॥ श्रुतं वा यदि वा कुलं मसमवे देकादशीद्वयं ॥ सर्दृष्टा नामभ
वेत्संमा पत्नी नामनराननः ॥ एकादशीद्वादशीवैराविंपोषवेपोद्दशी ॥ नवक्रतवानं पुण्यं द्वयो रुपया
नपारणे ॥ एकादश्यां निराहारः स्थित्वा हमपरे हनि ॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत ॥ प्रा

श्री
५२

न्मंमे सकलपापैर्देवदेवस्य चक्रिणः ॥ भक्तिभावेन तस्यास्तु उपवासं समाचरेत् ॥ ऊर्ध्वं हि देवस्य पु
रतो जागरं निशि तोषयेत् ॥ गीतैर्वाद्यैश्च नृत्यैश्च पुराणपठनादिभिः ॥ ततः प्रातः समुत्थाय द्वाद
श्यां शिवसेत्तनी ॥ स्नात्वा विष्णुं समभ्यर्च्य विधिवत्भिः पद्मैर्द्विजः ॥ पंचामृतेन संस्नाप्य एकादश्यां जना
र्दनः ॥ द्वादश्यां च पयःस्नानात् हरेः सायुज्यमश्नुते ॥ शुद्धान्नं निर्विवर्त्य भक्त्या नानेनकेशव ॥ प्रसी
दस्व त्वं भो ना नानहृषीकेश हरे भव ॥ एवं विज्ञाप्य देवेशं देवदेवं गदाधरं ॥ ब्राह्मणान्भोजयेद्भक्त्या ते
भ्यो दद्याच्च दक्षिणां ॥ ततः स्वबंधुभिः सार्द्धं नारायणपरायणः ॥ कृत्वा पंचमहायज्ञान् स्वयं भुंजीत
वाग्यतः ॥ एवं यः कुरुते भक्त्या पुण्यमेकादशीव्रतं ॥ स याति विष्णुभवनं पुनरावृत्तिदुर्लभं ॥ इत्युक्
का कमला नैव वरं दत्वा तिरोदधे ॥ सोऽपि विप्रो धनी भूत्वा पितृगेहं समागतः ॥ श्रीकृष्ण उवाच
एवं यः कुरुते राजन् ॥ कमलाव्रतमुत्तमं ॥ शृणुयाद्वासरे विष्णोः सर्वपापैः प्रमुच्यते ॥ ॥ इति
श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे पुरुषोत्तममासस्य कृष्णकमलानामैकादशी
यध्यायः ॥ युधिष्ठिर उवाच ॥ श्रुतानि षड्धर्माणि गोविंद विजगन्मनो ॥ एकादशी समं किंचि

उ.नं.र.
५३

तच्छ्रुत्वैव जनार्दन ॥ पुनरेकादशी ब्रूहि पापघ्नी पुण्यदायिनी ॥ यां कृत्वा मनुजो लोके प्राप्नु
यात्परमं पदं ॥ ॥ श्रीकृष्ण उवाच ॥ शुक्ले वा यदि वा कृष्णे यदा चैकादशी भवेत् तस्यां स्नात्वा जग
त्रीपालमोक्षसौख्यप्रदायिनी ॥ एकादशी कलौ राजन् भयबंधविमोचिनी ॥ कामदः सर्वकामा
णां पापानां पापघ्ना भुवि ॥ रविवारे यथा मांगल्ये संक्रमे वा नृपोत्तम ॥ एकादशी सदैवापाघ्ना पुत्र
पौत्रविवर्द्धनी ॥ एकादशी अनेकानि जन्मार्जितविसृष्टबलनिभैः ॥ आयुः कीर्तिं प्रदं नित्यं संतानारो
ग्यवर्द्धनं ॥ मोक्षदं नृप देहांते नित्यमेकादशीव्रतं ॥ ये कुर्वंति महीपाल स्वेच्छया परया युतः ॥ यथो
क्तविधिना लोके ते नरा विष्णुरूपिणः ॥ जीवन्मुक्तास्तु भूपाल हृष्टपुष्टे न चात्र संशयः ॥ ॥ युधि
ष्ठिर उवाच ॥ ॥ जीवन्मुक्ताः कथं कृष्ण विष्णुरूपाः कथं पुनः ॥ पापघ्ना स्युः कथं ते वै कौतुकं मह
द्धृदि मे ॥ श्रीकृष्ण उवाच ॥ ये च राजन् कलौ भक्त्या निर्मलेन मनसा नृप ॥ एकादशीं प्रकुर्वंति
विधिदृष्टेन कर्मणा ॥ न कथं विष्णुरूपास्ते जीवन्मुक्ताः कथं न हि ॥ सर्वपापहरं पुण्यं व्रतमे
कादशीमम ॥ न किंचिद्विद्यते राजन् न सर्वकामप्रदं स्मृतं ॥ एकादशी नरः पापान्मोचनं नेदाघानिश्चेर

ॐ
५४

ते ॥ वारणं चैव मद्रायां कृत्वा विस्मयमानसः ॥ ब्रह्महा यान्यस्तु ऊ हनने कामदा पावनं शुभं ॥
वांछितं सम भवेत् सोपि इहलोके परत्र च ॥ पवित्रा पावनी ह्येषा महापातकनाशिनी ॥ भक्तिर्वं कि
मदा चैव कल्हणं नृपसत्तम ॥ कामदायेर्विधानेन पूजयेत्पुरुषोत्तमं ॥ पुष्पधूपादिभिश्चैव नैवे
द्यैर्विविधैस्तथा ॥ कौसुमीं समर्पयेच्छास्त्रां कांकोद्ववस्तथा ॥ शाकं मधुपनान्नेश्च पुनर्भो
जनमैथुनं ॥ वैश्यं चोग्रतकर्मा च ह्यास्यांहृ यावज्जैघेत् ॥ द्यूतं क्रीडनं यानं निद्रां तैलं दंतधावनं ॥
परापवादं पैशुन्यं स्तेयं हिंसा न चाचरेत् ॥ क्रोधं च वितथं वाक्यं एकादश्यां विवर्जयेत् ॥ कांस्यमा
सं मसूरां च नैवेद्यं विनश्वभाषणं ॥ आयामेव प्रयासेव पुनर्भोजनमैथुनं ॥ द्वादश्यां वर्जयेत्पाकं
वद्धारदपीर्दिने ॥ अनेन विधिना राजन् विहिता चैव कामदा ॥ रात्रौ जागरणं कृत्वा पूजितः पुरु
षोत्तमः ॥ सर्वपापविनिर्मुक्तो याति परमां गतिं ॥ पठनात् श्रवणाद्राजन् गोसहस्रफलं ल
भेत् ॥ ॥ इति श्रीपद्मपुराणे उत्तरखंडे उमापतिनारदसंवादे पुरुषोत्तममाससंस्थशुक्ला
कामदानामध्यायः समाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥